# ॥ श्रीयोगेश्वरीसहस्रनामस्तोत्रम् ॥

## .. Shri Yogeshvari Sahasranama Stotra ..

sanskritdocuments.org

September 11, 2017

# .. Shri Yogeshvari Sahasranama Stotra ..

# ॥ श्रीयोगेश्वरीसहस्रनामस्तोत्रम् ॥

## Sanskrit Document Information

Text title : Shri Yogeshwari Sahasranama Stotram

File name : yogeshvarIsahasranAmastotram.itx

Category : sahasranAma, devii

Location : doc_devii

Proofread by : Avinash Sathaye, NA, PSA Easwaran psaeaswaran at gmail.com

Description/comments : rudrayAmale uttarakhaNDe devIcharitre (unsure)

Source : Also Indic Manuscript Collection at dla.library.upenn.edu

Acknowledge-Permission: http://chitpavanfoundation.org/Chitpavans/

Latest update : May 5, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

श्रीगणेशाय नमः ।
श्रीयोगेश्वर्यै नमः ।

अथ श्रीयोगेश्वरीसहस्रनामस्तोत्रं प्रारम्भः ।

ॐ या तुरीया परादेवी दोषत्रयविवर्जिता ।
सदानन्दतनुः शान्ता सैवाहमहमेव सा ॥ १॥

यस्याः संस्मरणादेव क्षीयन्ते भवभीतयः ।
तां नमामि जगद्धात्रीं योगिनीं परयोगिनीम् ॥ २॥

महदादि जगद्यस्यां जातं रज्जुभुजङ्गवत् ।
सा अम्बा पुरसंस्थाना पातु योगेश्वरेश्वरी ॥ ३॥

सच्चिदानन्दरूपाय प्रतीचेऽनन्तरूपिणे ।
नमो वेदान्तवेद्याय महसेऽमिततेजसे ॥ ४॥

मुनयो नैमिषारण्ये दीर्घसत्रप्रसङ्गतः ।
प्रहृष्टमनसा सूतं प्रप्रच्छुरिदमादरात् ॥ ५॥

ईश्वर उवाच
यो नित्यं पूजयेद्देवीं योगिनीं योगवित्तमाम् ।
तस्यायुः पुत्रसौख्यं च विद्यादात्री भवत्यसौ ॥ ६॥

यो देवीभक्तिसंयुक्तस्तस्य लक्ष्मीश्च किङ्करी ।
राजानो वश्यतां यान्ति स्त्रियो वै मदविह्वलाः ॥ ७॥

यो भवानीं महामायां पूजयेन्नित्यमादरात् ।
ऐहिकं च सुखं प्राप्य परब्रह्मणि लीयते ॥ ८॥

श्रीविष्णुरुवाच
देव देव महादेव नीलकण्ठ उमापते ।
रहस्यं प्रष्टुमिच्छामि संशयोऽस्ति महामते ॥ ९॥

चराचरस्य कर्ता त्वं संहर्ता पालकस्तथा ।
कस्या देव्यास्त्वया शम्भो क्रियते स्तुतिरन्वहम् ॥ १०॥

जप्यते परमो मन्त्रो ध्यायते किं त्वया प्रभो ।
वद शम्भो महादेव त्वत्तः का परदेवता ॥ ११॥

प्रसन्नो यदि देवेश परमेश पुरातन ।
रहस्यं परमं देव्या कृपया कथय प्रभो ॥ १२॥

विनाभ्यासं विना जाप्यं विना ध्यानं विनार्चनम् ।
प्राणायामं विना होमं विना नित्योदकक्रियाम् ॥ १३॥

विना दानं विना गन्धं विना पुष्पं विना बलिम् ।
विना भूतादिशुद्धिं च यथा देवी प्रसीदति ॥ १४॥

इति पृष्टस्तदा शम्भुर्विष्णुना प्रभविष्णुना ।
प्रोवाच भगवान्देवो विकसन्नेत्रपङ्कजः ॥ १५॥

श्रीशिव उवाच
साधु साधु सुरश्रेष्ठ पृष्टवानसि साम्प्रतम् ।
षण्मुखस्यापि यद्गोप्यं रहस्यं तद्वदामि ते ॥ १६॥

पुरा युगक्षये लोकान्कर्तुमिच्छुः सुरासुरम् ।
गुणत्रयमयी शक्तिश्चिद्रूपाऽऽद्या व्यवस्थिता ॥ १७॥

तस्यामहं समुत्पन्नो मत्तस्त्वं जगतःपिता ।
त्वत्तो ब्रह्मा समुद्भूतो लोककर्ता महाविभुः ॥ १८॥

ब्रह्मणोऽथर्षयो जातास्तत्त्वैस्तैर्महदादिभिः । ब्रह्मणो ऋषयो
चेतनेति ततः शक्तिर्मां काप्यालिङ्ग्य तिष्ठति ॥ १९॥ काप्यालिङ्ग्य तस्थुषी

आराधिता स्तुता सैव सर्वमङ्गलकारिणी ।
तस्यास्त्वनुग्रहादेव मया प्राप्तं परं पदम् ॥ २०॥

स्तौमि तां च महामायां प्रसन्ना च ततःशिवा ।
नामानि ते प्रवक्ष्यामि योगेश्वर्याः शुभानि च ॥ २१॥

एतानि प्रपठेद्विद्वान् मयोक्तानि सुरेश्वर । नमोऽन्तानि सुरेश्वर
तस्याः स्तोत्रं महापुण्यं स्वयङ्कल्पात्प्रकाशितम् ॥ २२॥

गोपनीयं प्रयत्नेन पठनीयं प्रयत्नतः ।
तव तत्कथयिष्यामि श्रुत्वा तदवधारय ॥ २३॥

यस्यैककालपठनात्सर्वैविघ्नाः पलायिताः ।
पठेत्सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ॥ २४॥

प्रसन्ना योगिनी तस्य पुत्रत्वेनानुकम्पते ।
यथा ब्रह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा ॥ २५॥

प्रसीदति तथा तेन स्तुत्वा देवी प्रसीदति । श्रुता देवी

अस्य श्रीयोगेश्वरीसहस्रनामस्तोत्रमन्त्रस्य
श्रीमहादेव ऋषिः । अनुष्टुप्छन्दः । श्रीयोगश्वरी देवता ।
ह्रीं बीजम् । श्रीं शक्तिः । क्लीं कीलकम् ।
मम सकलकामनासिध्यर्थं अम्बापुरनिवासिनीप्रीत्यर्थं
सहस्रनामस्तोत्रजपे विनियोगः ।
अथ न्यासः
महादेवऋषये नमः शिरसि ।
अनुष्टुप्छन्दसे नमः मुखे ।
श्रीयोगश्वरी देवतायै नमः हृदये ।
ह्रीं बीजाय नमः दक्षिणस्तने ।
श्रीं शक्तये नमः वामस्तने ।
क्लीं कीलकाय नमः नाभौ ।
विनियोगाय नमः पादयोः ॥

ॐ ह्रीं अङ्गुष्ठाभ्यां नमः ।
ॐ यं तर्जनीभ्यां नमः ।
ॐ यां मध्यमाभ्यां नमः ।
ॐ रुद्रादये अनामिकाभ्यां नमः ।
ॐ योगेश्वर्यै कनिष्ठिकाभ्यां नमः ।
ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥

एवं हृदयादि षडङ्गन्यासः
ॐ ह्रीं हृदयाय नमः ।
ॐ यं शिरसे स्वाहा ।
ॐ यां शिखायै वषट् ।
ॐ रुद्रादये कवचाय हुम् ।
ॐ योगेश्वर्यै नेत्रत्रयाय वौषट् ।
ॐ स्वाहा अस्त्राय फट् ।
ॐ भूर्भुवस्वरोमिति दिग्बन्धः ॥

अथ ध्यानम् ।
ॐ कालाभ्राम्यां कटाक्षैरलिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कपालं डमरुमपि करैरुद्वहन्तीं त्रिनेत्राम् । त्रिशिखमपि
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेदम्बाजयाख्यां त्रिदशपरिणतां सिद्धिकामो नरेन्द्रः ॥ १॥ त्रिदशपरिवृतां
इति ध्यात्वा ।
लं पृथिव्यात्मकं गन्धं समर्पयामि ।
हं आकाशात्मकं पुष्पं समर्पयामि ।
यं वाय्वात्मकं धूपं समर्पयामि ।
रं आग्नेयात्मकं दीपं समर्पयामि ।
वं अमृतात्मकं नैवेद्यं समर्पयामि ।
सं सर्वात्मकं ताम्बूलं समर्पयामि ।
इति पञ्चोपचारैः सम्पूज्य
ॐ ह्रीं यं यां रुद्रादये योगेश्वर्यै स्वाहा ।

अथ सहस्रनामस्तवनम् ।
ॐ योगिनी योगमाया च योगपीठस्थितिप्रिया ।
योगिनी योगदीक्षा च योगरूपा च योगिनी ॥ १॥

योगगम्या योगरता योगीहृदयवासिनी ।
योगस्थिता योगयुता योगमार्गरता सदा ॥ २॥

योगेश्वरी योगनिद्रा योगदात्री सरस्वती ।
तपोयुक्ता तपःप्रीतिः तपःसिद्धिप्रदा परा ॥ ३॥ तपोरता तपोयुक्ता

निशुम्भशुम्भसंहन्त्री रक्तबीजविनाशिनी ।
मधुकैटभहन्त्री च महिषासुरघातिनी ॥ ४॥

शारदेन्दुप्रतीकाशा चन्द्रकोटिप्रकाशिनी ।
महामाया महाकाली महामारी क्षुधा तृषा ॥ ५॥

निद्रा तृष्णा चैकवरा कालरात्रिर्दुरत्यया ।
महाविद्या महावाणी भारती वाक्सरस्वती ॥ ६॥

आर्या ब्राह्मी महाधेनुर्वेदगर्भा त्वधीश्वरी । कामधेनुर्वेदगर्भा

कराला विकरालाख्या अतिकालातिदीपका ॥ ७॥ अतिकाला तृतीयका
एकलिङ्गा योगिनी च डाकिनी भैरवी तथा ।
महाभैरवकेन्द्राक्षी त्वसिताङ्गी सुरेश्वरी ॥ ८॥

शान्तिश्चन्द्रोपमाकर्षा कलाकान्तिः कलानिधिः । शान्तिश्चन्द्रार्धमाकर्षी
सर्वसङ्क्षोभिणी शक्तिः सर्वाह्लादकरी प्रिया ॥ ९॥

सर्वाकर्षिणिका शक्तिः सर्वविद्राविणी तथा ।
सर्वसम्मोहिनीशक्तिः सर्वस्तम्भनकारिणी ॥ १०॥ Extra verse
सर्वजृम्भनिका नाम शक्तिः सर्वत्र शङ्करी ।
महासौभाग्यगम्भीरा पीनवृत्तघनस्तनी ॥ ११॥

रत्नकोटिविनिक्षिप्ता साधकेप्सितभूषणा । रत्नपीठ
नानाशस्त्रधरा दिव्या वसतीहर्षितानना ॥ १२॥

खड्गपात्रधरा देवी दिव्यवस्त्रा च योगिनी ।
सर्वसिद्धिप्रदा देवी सर्वसम्पत्प्रदा तथा ॥ १३॥
सर्वप्रियङ्करी चैव सर्वमङ्गलकारिणी ।
सा वैष्णवी सैव शैवी महारौद्री शिवा क्षमा ॥ १४॥

कौमारी पार्वती चैव सर्वमङ्गलदायिनी ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी परा ॥ १५॥

वाराही चैव माहेन्द्री चामुण्डा सर्वदेवता ।
अणिमा महिमा सिद्धिर्लघिमा शिवरूपिका ॥ १६॥

वशित्वसिद्धिः प्राकाम्या मुक्तिरिच्छाष्टमी परा ।
सर्वाकर्षिणिकाशक्तिः सर्वाह्लादकरी प्रिया ॥ १७॥

सर्वसम्मोहिनीशक्तिः सर्वस्तम्भनकारिणी ।
सर्वजृम्भणिकानाम शक्तिः सर्ववशङ्करी ॥ १८॥

सर्वार्थजनिकाशक्तिः सर्वसम्पत्तिशङ्करी ।
सर्वार्थरञ्जिनीशक्तिः सर्वोन्मोदनकारिणी ॥ १९॥ सर्वोन्मादनकारिणी ??

सर्वार्थसाधिकाशक्तिः सर्वसम्पत्तिपूरिका ।
सर्वमन्त्रमयीशक्तिः सर्वद्वन्द्वक्षयङ्करी ॥ २०॥

सर्वकामप्रदा देवी सर्वदुःखप्रमोचनी ।
सर्वमृत्युप्रशमनी सर्वविघ्ननिवारिणी ॥ २१॥

सर्वाङ्गसुन्दरी देवी सर्वसौभाग्यदायिनी ।
सर्वरक्षाकरी देवी अक्षवर्णविराजिता ॥ २२॥ अक्षवर्णपराजिता

नौमि तां च जगद्धात्रीं योगनिद्रास्वरूपिणीम् ।
सर्वस्याद्या विशालाक्षी नित्या बुद्धिस्वरूपिणी ॥ २३॥

श्वेतपर्वतसङ्काशा श्वेतवस्त्रा महासती ।
नीलहस्ता रक्तमध्या सुश्वेतस्तनमण्डला ॥ २४॥

रक्तपादा नीलजङ्घा सुचित्रजघना विभुः ।
चित्रमाल्याम्बरधरा चित्रगन्धानुलेपना ॥ २५॥

जपाकुसुमवर्णाभा रक्ताम्बरविभूषणा ।
रक्तायुधा रक्तनेत्रा रक्तकुञ्चितमूर्धजा ॥ २६॥

सर्वस्याद्या महालक्ष्मी नित्या बुद्धिस्वरूपिणी ।
चतूर्भुजा रक्तदन्ता जगद्व्याप्य व्यवस्थिता ॥ २७॥

नीलाञ्जनचयप्रख्या महादंष्ट्रा महानना ।
विस्तीर्णलोचना देवी वृत्तपीनपयोधरा ॥ २८॥

एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ।
भीमा देवीति सम्पूज्या पुत्रपौत्रप्रदायिनी ॥ २९॥

या सात्त्विकगुणा प्रोक्ता या विशिष्टसरस्वती । माया विद्यासरस्वती
सा देवकार्यवसति स्वरूपमपरं दधौ ॥ ३०॥

The verse number is shifted because extra verse above

देवी स्तुता तदा गौरी स्वदेहात्तरुणीं सृजत् ।
ख्याता वै कौशिकी देवी ततः कृष्णाभवत्सती ॥ ३०॥

हिमाचलकृतस्थाना कालिकेति च विश्रुता ।
महासरस्वतीदेवी शुम्भासुरनिबर्हिणी ॥ ३१॥

श्वेतपर्वतसङ्काशा श्वेतवस्त्रविभूषणा ।
नानारत्नसमाकीर्णा वेदविद्याविनोदिनी ॥ ३२॥

शस्त्रव्रातसमायुक्ता भारती सा सरस्वती ।
वागीश्वरी पीतवर्णा सैवोक्ता कामदालया ॥ ३३॥

कृष्णवर्णा महालम्बा नीलोत्पलविलोचना ।
गम्भीरनाभिस्त्रिवली विभूषिततनूदरी ॥ ३४॥

सुकर्कशा चन्द्रभासा वृतपीनपयोधरा । सा कर्कशा
चतुर्भुजा विशालाक्षी कामिनी पद्मलोचना ॥ ३५॥

शाकम्भरी समाख्याता शताक्षी वनशङ्करी । शताक्षी चैव कीर्त्यते
शुचिः शाकम्भरी देवी पूजनीया प्रयत्नतः ॥ ३६॥

त्रिपुरा विजया भीमा तारा त्रैलोक्यसुन्दरी ।
शाम्भवी त्रिजगन्माता स्वरा त्रिपुरसुन्दरी ।
कामाक्षी कमलाक्षी च धृतिस्त्रिपुरतापिनी ॥ ३७॥

जया जयन्ती शिवदा जलेशी चरणप्रिया ।
गजवक्त्रा त्रिनेत्रा च शङ्खिनी चापराजिता ॥ ३८॥

महिषघ्नी शुभानन्दा स्वधा स्वाहा शुभानना ।
विद्युज्जिह्वा त्रिवक्त्रा च चतुर्वक्त्रा सदाशिवा ।
कोटराक्षी शिखिरवा त्रिपदा सर्वमङ्गला ।
मयूरवदना सिद्धिर्बुद्धिः काकरवा सती ॥ ३९॥

हुङ्कारा तालकेशी च सर्वतारा च सुन्दरी ।
सर्पास्या च महाजिह्वा पाशपाणिर्गरुत्मती ॥ ४०॥

पद्मावती सुकेशी च पद्मकेशी क्षमावती ।
पद्मावती सुरमुखी पद्मवक्त्रा षडानना ॥ ४१॥ पद्मावती सुनासा च

त्रिवर्गफलदा माया रक्षोघ्नी पद्मवासिनी ।
प्रणवेशी महोल्काभा विघ्नेशी स्तम्भिनी खला ॥ ४२॥

मातृकावर्णरूपा च अक्षरोच्चारिणी गुहा । अक्षरोच्चाटिनी
अजपा मोहिनी श्यामा जयरूपा बलोत्कटा ॥ ४३॥

वाराही वैष्णवी जृम्भा वात्याली दैत्यतापिनी ।
क्षेमङ्करी सिद्धिकरी बहुमाया सुरेश्वरी ॥ ४४॥

छिन्नमूर्धा छिन्नकेशी दानवेन्द्रक्षयङ्करी ।
शाकम्भरी मोक्षलक्ष्मीर्जम्भिनी बगलमुखी ॥ ४५॥

अश्वारूढा महाक्लिन्ना नारसिंही गजेश्वरी ।
सिद्धेश्वरी विश्वदुर्गा चामुण्डा शववाहना ॥ ४६ ॥

ज्वालामुखी कराली च चिपिटा खेचरेश्वरी । त्रिपटा
शुम्भघ्नी दैत्यदर्पघ्नी विन्ध्याचलनिवासिनी ॥ ४७॥

योगिनी च विशालाक्षी तथा त्रिपुरभैरवी ।
मातङ्गिनी करालाक्षी गजारूढा महेश्वरी ॥ ४८॥

पार्वती कमला लक्ष्मीः श्वेताचलनिभा उमा । निभा उमा (ईन् बोथ् फ़िलेस् इत् इस् समे)
कात्यायनी शङ्खरवा घुर्घुरा सिंहवाहिनी ॥ ४९॥

नारायणीश्वरी चण्डी घण्टाली देवसुन्दरी ।
विरूपा वामनी कुब्जा कर्णकुब्जा घनस्तनी ॥ ५०॥

नीला शाकम्भरी दुर्गा सर्वदुर्गार्तिहारिणी ।
दंष्ट्राङ्कितमुखा भीमा नीलपत्रशिरोधरा ॥ ५१॥

महिषघ्नी महादेवी कुमारी सिंहवाहिनी ।
दानवांस्तर्जयन्ती च सर्वकामदुघा शिवा ॥ ५२॥

कन्या कुमारिका चैव देवेशी त्रिपुरा तथा ।
कल्याणी रोहिणी चैव कालिका चण्डिका परा ॥ ५३॥

शाम्भवी चैव दुर्गा च सुभद्रा च यशस्विनी ।
कालात्मिका कलातीता कारुण्यहृदया शिवा ॥ ५४॥

कारुण्यजननी नित्या कल्याणी करुणाकरा ।
कामाधारा कामरूपा कालचण्डस्वरूपिणी ॥ ५५॥ कालदण्डस्वरूपिणी

कामदा करुणाधारा कालिका कामदा शुभा ।
चण्डवीरा चण्डमाया चण्डमुण्डविनाशिनी ॥ ५६॥

चण्डिका शक्तिरत्युग्रा चण्डिका चण्डविग्रहा ।
गजानना सिंहमुखी गृध्रास्या च महेश्वरी ॥ ५७॥

उष्ट्रग्रीवा हयग्रीवा कालरात्रिर्निशाचरी ।
कङ्कारी रौद्रचित्कारी फेत्कारी भूतडामरी ॥ ५८॥ रौद्रछित्कारी

वाराही शरभास्या च शताक्षी मांसभोजनी ।
कङ्काली डाकिनी काली शुक्लाङ्गी कलहप्रिया ॥ ५९॥

उलूकिका शिवारावा धूम्राक्षी चित्रनादिनी ।
ऊर्ध्वकेशी भद्रकेशी शवहस्ता च मालिनी ॥ ६०॥

कपालहस्ता रक्ताक्षी श्येनी रुधिरपायिनी ।
खड्गिनी दीर्घलम्बोष्ठी पाशहस्ता बलाकिनी ॥ ६१॥

काकतुण्डा पात्रहस्ता धूर्जटी विषभक्षिणी ।
पशुघ्नी पापहन्त्री च मयूरी विकटानना ॥ ६२॥

भयविध्वंसिनी चैव प्रेतास्या प्रेतवाहिनी ।
कोटराक्षी लसज्जिह्वा अष्टवक्त्रा सुरप्रिया ॥ ६३॥

व्यात्तास्या धूमनिःश्वासा त्रिपुरा भुवनेश्वरी ।
बृहत्तुण्डा चण्डहस्ता प्रचण्डा चण्डविक्रमा ॥ ६४॥ दण्डहस्ता

स्थूलकेशी बृहत्कुक्षिर्यमदूती करालिनी ।
दशवक्त्रा दशपदा दशहस्ता विलासिनी ॥ ६५॥

अनाद्यन्तस्वरूपा च क्रोधरूपा मनोगतिः । आदिरन्तस्वरूपा आदिहान्तस्वरूपा
मनुश्रुतिस्मृतिर्घ्राणचक्षुस्त्वग्रसनात्मिका ॥ ६६॥ त्वग्रसनारसः ॥

योगिमानससंस्था च योगसिद्धिप्रदायिका ।
उग्राणी उग्ररूपा च उग्रतारास्वरूपिणी ॥ ६७॥

उग्ररूपधरा चैव उग्रेशी उग्रवासिनी ।
भीमा च भीमकेशी च भीममूर्तिश्च भामिनी ॥ ६८॥

भीमातिभीमरूपा च भीमरूपा जगन्मयी ।
खड्गिन्यभयहस्ता च घण्टाडमरुधारिणी ॥ ६९॥

पाशिनी नागहस्ता च योगिन्यङ्कुशधारिणी ।
यज्ञा च यज्ञमूर्तिश्च दक्षयज्ञविनाशिनी ॥ ७०॥

यज्ञदीक्षाधरा देवी यज्ञसिद्धिप्रदायिनी ।

हिरण्यबाहुचरणा शरणागतपालिनी ॥ ७१॥

अनाम्न्यनेकनाम्नी च निर्गुणा च गुणात्मिका ।
मनो जगत्प्रतिष्ठा च सर्वकल्याणमूर्तिनी ॥ ७२॥

ब्रह्मादिसुरवन्द्या च गङ्गाधरजटास्थिता ।
महामोहा महादीप्तिः सिद्धविद्या च योगिनी ॥ ७३॥

योगिनी चण्डिका सिद्धा सिद्धसाध्या शिवप्रिया ।
सरयूर्गोमती भीमा गौतमी नर्मदा मही ॥ ७४॥

भागीरथी च कावेरी त्रिवेणी गण्डकी सरः । सरा
सुषुप्तिर्जागृतिर्निद्रा स्वप्ना तुर्या च चक्रिणी ॥ ७५॥

अहल्यारुन्धती चैव तारा मन्दोदरी तथा ।
देवी पद्मावती चैव त्रिपुरेशस्वरूपिणी ॥ ७६॥

एकवीरा महादेवी कनकाढ्या च देवता । एकवीरा तमोदेवी
शूलिनी परिघास्त्रा च खड्गिन्याबाह्यदेवता ॥ ७७॥

कौबेरी धनदा याम्याऽऽग्नेयी वायुतनुर्निशा ।
ईशानी नैर्ऋतिः सौम्या माहेन्द्री वारुणीसमा ॥ ७८॥ वारुणी तथा

सर्वर्षिपूजनीयाङ्घ्रिः सर्वयन्त्राधिदेवता ।
सप्तधातुमयीमूर्तिः सप्तधात्वन्तराश्रया ॥ ७९॥

देहपुष्टिर्मनस्तुष्टिरन्नपुष्टिर्बलोद्धता ।
तपोनिष्ठा तपोयुक्ता तापसःसिद्धिदायिनी ॥ ८०॥

तपस्विनी तपःसिद्धिः तापसी च तपःप्रिया ।
औषधी वैद्यमाता च द्रव्यशक्तिःप्रभाविनी ॥ ८१॥

वेदविद्या च वैद्या च सुकुला कुलपूजिता ।
जालन्धरशिरच्छेत्री महर्षिहितकारिणी ॥ ८२॥

योगनीतिर्महायोगा कालरात्रिर्महारवा ।
अमोहा च प्रगल्भा च गायत्री हरवल्लभा ॥ ८३॥

विप्राख्या व्योमकारा च मुनिविप्रप्रिया सती ।
जगत्कर्त्री जगत्कारी जगच्छाया जगन्निधिः ॥ ८४॥ जगश्वासा जगन्निधिः

जगत्प्राणा जगद्दंष्ट्रा जगज्जिह्वा जगद्रसा ।
जगच्चक्षुर्जगद्घ्राणा जगच्छ्रोत्रा जगन्मुखा ॥ ८५॥

जगच्छत्रा जगद्वक्त्रा जगद्भर्त्री जगत्पिता ।
जगत्पत्नी जगन्माता जगद्भ्राता जगत्सुहृत् ॥ ८६॥ जगद्धात्री जगत्सुहृत्

जगद्धात्री जगत्प्राणा जगद्योनिर्जगन्मयी ।
सर्वस्तम्भी महामाया जगद्दीक्षा जया तथा ॥ ८७॥

भक्तैकलभ्या द्विविधा त्रिविधा च चतुर्विधा । भक्तैकलक्ष्या
इन्द्राक्षी पञ्चभूता च सहस्ररूपधारिणी ॥ ८८॥ पञ्चरूपा

मूलादिवासिनी चैव अम्बापुरनिवासिनी ।
नवकुम्भा नवरुचिः कामज्वाला नवानना ॥ ८९॥

गर्भज्वाला तथा बाला चक्षुर्ज्वाला नवाम्बरा ।
नवरूपा नवकला नवनाडी नवानना ॥ ९०॥

नवक्रीडा नवविधा नवयोगिनिका तथा ।
वेदविद्या महाविद्या विद्यादात्री विशारदा ॥ ९१॥

कुमारी युवती बाला कुमारीव्रतचारिणी ।
कुमारीभक्तसुखिनी कुमारीरूपधारिणी ॥ ९२॥

भवानी विष्णुजननी ब्रह्मादिजननी परा ।
गणेशजननी शक्तिः कुमारजननी शुभा ॥ ९३॥

भाग्याश्रया भगवती भक्ताभीष्टप्रदायिनी ।
भगात्मिका भगाधारा रूपिणी भगमालिनी ॥ ९४॥

भगरोगहरा भव्या सुश्रूः परममङ्गला ।
शर्वाणी चपलापाङ्गी चारुचन्द्रकलाधरा ॥ ९५॥

विशालाक्षी विश्वमाता विश्ववन्द्या विलासिनी । विश्वविद्या विलासिनी
शुभप्रदा शुभावर्ता वृत्तपीनपयोधरा ॥ ९६॥

अम्बा संसारमथिनी मृडानी सर्वमङ्गला ।
विष्णुसंसेविता शुद्धा ब्रह्मादिसुरसेविता ॥ ९७॥

परमानन्दशक्तिश्च परमानन्दरूपिणी । रमानन्दस्वरूपिणी
परमानन्दजननी परमानन्ददायिनी ॥ ९८॥

परोपकारनिरता परमा भक्तवत्सला ।
आनन्दभैरवी बालाभैरवी बटुभैरवी ॥ ९९॥

श्मशानभैरवी कालीभैरवी पुरभैरवी ॥ १००॥

पूर्णचन्द्राभवदना पूर्णचन्द्रनिभांशुका ।
शुभलक्षणसम्पन्ना शुभानन्तगुणार्णवा ॥ १०१॥

शुभसौभाग्यनिलया शुभाचाररता प्रिया ।
सुखसम्भोगभवना सर्वसौख्यानिरूपिणी ॥ १०२॥

अवलम्बा तथा वाग्मी प्रवरा वाग्विवादिनी । वाद्यवादिनी
घृणाधिपावृता कोपादुत्तीर्णकुटिलानना ॥ १०३॥

पापदापापनाशा च ब्रह्माग्नीशापमोचनी ।
सर्वातीता च उच्छिष्टचाण्डाली परिघायुधा ॥ १०४॥

ओङ्कारी वेदकारी च ह्रीङ्कारी सकलागमा ।
यङ्कारी चर्चिता चर्चिचर्चिता चक्ररूपिणी ॥ १०५॥

महाव्याधवनारोहा धनुर्बाणधरा धरा । वरा
लम्बिनी च पिपासा च क्षुधा सन्देशिका तथा ॥ १०६॥

भुक्तिदा मुक्तिदा देवी सिद्धिदा शुभदायिनी ।
सिद्धिदा बुद्धिदा माता वर्मिणी फलदायिनी ॥ १०७॥

चण्डिका चण्डमथनी चण्डदर्पनिवारिणी ।
चण्डमार्तण्डनयना चन्द्राग्निनयना सती ॥ १०८॥

सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयका ।
जपापावकसिन्दुरा रक्तचन्दनधारिणी ॥ १०९॥ जपास्तबकसिन्दूर
रक्तसिन्दूरधारिणी

कर्पूरागरुकस्तूरीकुङ्कुमद्रवलेपिनी ।
विचित्ररत्नपृथिवीकल्मषघ्नी तलस्थिता ॥ ११०॥

भगात्मिका भगाधारा रूपिणी भगमालिनी ।

लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्गनिवासिनी ॥ १११॥

भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ।
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्चिता ॥ ११२॥

स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता ।
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पधारिणी ॥ ११३॥

पुण्डीककरा पुण्या पुण्यदा पुण्यरूपिणी ।
पुण्यज्ञेया पुण्यवन्द्या पुण्यवेद्या पुरातनी ॥ ११४॥ पुण्यमूर्तिः पुरातना

अनवद्या वेदविद्या वेदवेदान्तरूपिणी ।
मायातीता सृष्टमाया माया धर्मात्मवन्दिता ॥ ११५॥

असृष्टा सङ्गरहिता सृष्टिहेतुः कपर्दिनी ।
वृषारूढा शूलहस्ता स्थितिसंहारकारिणी ॥ ११६॥

मन्दस्थितिः शुद्धरूपा शुद्धचित्ता मुनिस्तुता ।
महाभाग्यवती दक्षा दक्षाध्वरविनाशिनी ॥ ११७॥

अपर्णानन्यशरणा भक्ताभीष्टफलप्रदा ।
नित्या सुन्दरसर्वाङ्गी सच्चिदानन्दलक्षणा ॥ ११८॥

कमला केशिजा केशी कर्षा कर्पूरकालिजा ।
गिरिजा गर्वजा गोत्रा अकुला कुलजा तथा ॥ ११९॥

दिनजा दिनमाना च वेदजा वेदसम्भृता । वेदसंमता
क्रोधजा कुटजा धारा परमा बलगर्विता ॥ १२०॥

सर्वलोकोत्तराभावा सर्वकालोद्भवात्मिका ।
कुण्डगोलोद्भवप्रीता कुण्डगोलोद्भवात्मिका ॥ १२१॥

कुण्डपुष्पसदाप्रीतिः पुष्पगोलसदारतिः ।
शुक्रमूर्तिः शुक्रदेहा शुक्रपुजितमूर्तिनी ॥ १२२॥ शुक्रपूजकमूर्तिनी

विदेहा विमला क्रूरा चोला कर्नाटकी तथा । चौण्डा कर्नाटकी
त्रिमात्रा उत्कला मौण्डी विरेखा वीरवन्दिता ॥ १२३॥

श्यामला गौरविपीना मागधेश्वरवन्दिता ।
पार्वती कर्मनाशा च कैलासवासिका तथा ॥ १२४॥

शालग्रामशिला माली शार्दूला पिङ्गकेशिनी ।
नारदा शारदा चैव रेणुका गगनेश्वरी ॥ १२५॥

धेनुरूपा रुक्मिणी च गोपिका यमुनाश्रया ।
सुकण्ठा कोकिला मेना चिरानन्दा शिवात्मिका ॥ १२६॥

कन्दर्पकोटिलावण्या सुन्दरा सुन्दरस्तनी ।
विश्वपक्षा विश्वरक्षा विश्वनाथप्रिया सती ॥ १२७॥

योगिनी योगयुक्ता च योगाङ्गध्यानशालिनी ।
योगपट्टधरा मुक्ता मुक्तानां परमागतिः ॥ १२८॥

कुरुक्षेत्रावनीः काशी मथुरा काञ्च्यवन्तिका ।
अयोध्या द्वारका माया तीर्था तीर्थकरी प्रिया ॥ १२९॥

त्रिपुष्कराऽप्रमेया च कोशस्था कोशवासिनी ।
कुशावर्ता कौशिकी च कोशाम्बा कोशवर्धिनी ॥ १३०॥

पद्मकोशा कोशदाक्षी कुसुम्भकुसुमप्रिया ।
तुलाकोटी च काकुत्स्था स्थावरा च वराश्रया ॥ १३१॥

ॐ ह्रीं यं यां रुद्रदैवत्यायै योगेश्वरीर्येस्वाहा ।
ॐ ह्रीं यं यां -
पुत्रदा पौत्रदा पुत्री द्रव्यदा दिव्यभोगदा ।
आशापूर्णा चिरञ्जीवी लङ्काभयविवर्धिनी ॥ १३२॥

स्त्रुक् स्त्रुवा सामिधेनी च सुश्रद्धा श्राद्धदेवता ।
माता मातामही तृप्तिः पितुर्माता पितामही ॥ १३३॥

स्नुषा दौहित्रिणी पुत्री लोकक्रीडाभिनन्दिनी । दोलाक्रीडाभिनन्दिनी
पोषिणी शोषिणी शक्तिर्दीर्घकेशी सुलोमशा ॥ १३४॥ दीर्घशक्तिः

सप्ताब्धिसंश्रया नित्या सप्तद्वीपाब्धिमेखला । सप्तद्वीपा वसुन्धरा
सूर्यदीप्तिर्वज्रशक्तिर्मदोन्मत्ता च पिङ्गला ॥ १३५॥ मनोन्मत्ता

सुचक्रा चक्रमध्यस्था चक्रकोणनिवासिनी ।
सर्वमन्त्रमयीविद्या सर्वमन्त्राक्षरा वरा ॥ १३६॥

सर्वज्ञदा विश्वमाता भक्तानुग्रहकारिणी ।
विश्वप्रिया प्राणशक्तिरनन्तगुणनामधीः ॥ १३७॥

पञ्चाशद्विष्णुशक्तिश्च पञ्चाशन्मातृकामयी ।
द्विपञ्चाशद्वपुश्रेणी त्रिषष्ट्यक्षरसंश्रया ॥ १३८॥

चतुःषष्टिमहासिद्धिर्योगिनी वृन्दवन्दिनी । वृन्दवन्दिता
चतुःषड्वर्णनिर्णेयी चतुःषष्टिकलानिधिः ॥ १३९॥

अष्टषष्टिमहातीर्थक्षेत्रभैरववासिनी । भैरववन्दिता
चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकाप्रिया ॥ १४०॥

सहस्रपत्रनिलया सहस्रफणिभूषणा ।
सहस्रनामसंस्तोत्रा सहस्राक्षबलापहा ॥ १४१॥

प्रकाशाख्या विमर्शाख्या प्रकाशकविमर्शका ।
निर्वाणचरणा देवी चतुश्चरणसंज्ञका ॥ १४२॥

चतुर्विज्ञानशक्त्याढ्या सुभगा च क्रियायुता ।
स्मरेशा शान्तिदा इच्छा इच्छाशक्तिसमान्विता ॥ १४३॥

निशाम्बरा च राजन्यपूजिता च निशाचरी ।
सुन्दरी चोर्ध्वकेशी च कामदा मुक्तकेशिका ॥ १४४॥

मानिनीति समाख्याता वीराणां जयदायिनी ।
यामलीति समाख्याता नासाग्राबिन्दुमालिनी ॥ १४५॥

या गङ्गा च करालाङ्गी चन्द्रिकाचलसंश्रया । या कङ्का
चक्रिणी शङ्खिनी रौद्रा एकपादा त्रिलोचना ॥ १४६॥

भीषणी भैरवी भीमा चन्द्रहासा मनोरमा ।
विश्वरूपा महादेवी घोररूपा प्रकाशिका ॥ १४७॥

कपालमालिकायुक्ता मूलपीठस्थिता रमा ।
योगिनी विष्णुरूपा च सर्वदेवर्षिपूजिता ॥ १४८॥

सर्वतीर्थपरा देवी तीर्थदक्षिणतः स्थिता ।
श्रीसदाशिव उवाच
दिव्यनामसहस्रं ते योगेश्वर्या मयेरितम् ॥ १४९॥

पुण्यं यशस्यमायुष्यं पुत्रपौत्रविवर्धनम् ।
सर्ववश्यकरं श्रेष्ठं भुक्तिमुक्तिप्रदं भुवि ।
यः पठेत्पाठयेद्वापि स मुक्तो नात्र संशयः ।
अष्टम्यां भूतपौर्णम्यान्नवम्यां दर्शभौमयोः ॥ १५० ॥

अयनेषूपरागे च पुण्यकाले विशेषतः ।
सर्वसौभाग्यसिद्ध्यर्थं जपनीयं प्रयत्नतः ॥ १५१ ॥

सर्वाभीष्टकरं पुण्यं नित्यमङ्गलदायकम् ।
इयं नामावली तुभ्यं मयाद्य समुदीरिता ॥ १५२ ॥

गोपनीया प्रयत्नेन नाख्येया च कदाचन ।
भक्ताय ज्येष्ठपुत्राय देयं शिष्याय धीमते ॥ १५३ ॥

आवहन्तीति मन्त्रेण युक्तान्येतानि सादरम् । एतानि धीमते
यो जपेत्सततं भक्त्या स कामांल्लभते ध्रुवम् ॥ १५४ ॥

कार्याण्यावाहनादीनि देव्याः शुचिरनात्मभिः ।
आवहन्तीति मन्त्रेण प्रत्येकं च यथाक्रमम् ॥ १५५ ॥

कर्तव्यं तर्पणं चापि तेन मन्त्रेण मूलवत् ।
तदन्वितैश्च होमोऽत्र कर्तव्यस्तैश्च मूलतः ॥ १५६ ॥

एतानि दिव्यनामानि श्रुत्वा ध्यात्वापि यो नरः ।
ध्यात्वा देवीं च सततं सर्वकामार्थसिद्धये ॥ १५७ ॥

एतज्जपप्रसादेन नित्यतृप्तो वसाम्यहम् ।
सन्तुष्टहृदयो नित्यं वसाम्यत्रार्चयन् चिरम् ॥ १५८ ॥

स्वापकाले प्रबोधे च यात्राकाले विशेषतः ।
तस्य सर्वभयं नास्ति रणे च विजयी भवेत् ॥ १५९ ॥

राजद्वारे सभास्थाने विवादे विप्लवे तथा ।
चोरव्याघ्रभयं नास्ति सङ्ग्रामे जयवर्धनम् ॥ १६० ॥ तस्य चोरभयं नास्ति

क्षयापस्मारकुष्ठादितापज्वरनिवारणम् ।
महाज्वरं तथात्युग्रं शीतज्वरनिवारणम् ॥ १६१ ॥

दोषादिसन्निपातं च रोगाणां हन्ति वर्चसा । रोगं हन्ति च सर्वशः

भूतप्रेतपिशाचाश्च रक्षां कुर्वन्ति सर्वशः ॥ १६२॥ सर्वतः

जपेत्सहस्रनामाख्यं योगिन्याः सर्वकामदम् ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ १६३॥

त्रिकालमेककालं वा श्रद्धया प्रयतः पठेत् ।
सर्वान् रिपून्क्षणाज्जित्वा यः पुमाञ्छ्रियमाप्नुयात् ॥ १६४॥ सपुमाञ्छ्रियम्

डाकिनी शाकिनी चैव वेतालब्रह्मराक्षसम् ।
कूष्माण्डादिभयं सर्वं नश्यति स्मरणात्ततः ॥ १६५॥

वने रणे महाघोरे कारागृहनियन्त्रके ।
सर्वसङ्कटनाशार्थं स्तोत्रपाठः सुसिद्धये ॥ १६६॥ पठेत्स्तोत्रमनन्यधीः

वन्ध्या वा काकवन्ध्या वा मृतवन्ध्या च याङ्गना ।
श्रुत्वा स्तोत्रमिदं पुत्रांल्लभते चिरजीविनः ॥ १६७॥

स्वयम्भुकुसुमैः शुक्लैः सुगन्धिकुसुमान्वितैः ।
कुङ्कुमागरुकस्तूरीसिन्दूरादिभिरर्चयेत् ॥ १६८॥

मीनमांसादिभिर्युक्तैर्मध्वाज्यैः पायसान्वितः ।
फलपुष्पादिभिर्युक्तैः मध्वाज्यैः पायसान्वितैः । मीनमांसादिभिर्युक्तैः
पक्वान्नैः षड्रसैर्भोज्यैः स्वाद्वन्नैश्च चतुर्विधैः ॥ १६९॥

कुमारीं पूजयेद्भक्त्या ब्राह्मणांश्च सुवासिनीः ।
शक्तितो दक्षिणां दत्वा वासोऽलङ्कारभूषणैः ॥ १७०॥ वासोऽलङ्करणादिभिः

अनेन विधिना पूज्या देव्याः सन्तुष्टिकामदा ।
सहस्रनामपाठे तु कार्यसिद्धिर्नसंशयः ॥ १७१॥

रमाकान्त सुराधीश प्रोक्तं गुह्यतरं मया ।
नासूयकाय वक्तव्यं परशिष्याय नो वदेत् ॥ १७२॥ नासूयवे च

देवीभक्ताय वक्तव्यं मम भक्ताय माधव ।
तव भक्ताय वक्तव्यं न मूर्खायाततायिने ॥ १७३॥

सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ।
नानया सदृशी विद्या न देव्या योगिनी परा ॥ १७४॥ न देवी योगिनी परा

इति श्रीरुद्रयामले उत्तरखण्डे देवीचरित्रे

विष्णुशङ्करसंवादे योगेश्वरीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

Proofread by Avinash Sathaye, NA, PSA Easwaran psaeaswaran at gmail.com

The variations are given on the right side of the verses.

.. Shri Yogeshvari Sahasranama Stotra ..

Searchable pdf was typeset using generateactualtext feature of XeLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*